ष्यञ् । तत्रहिते गोधूमकलायादौ । अपूपादिगणपाठात् नि० अभ्येषशब्दोऽप्युक्तार्थे ततोऽपि क्यतौ उक्तार्थे ।

**अभ्यूह** अभि+ऊह-घञ् । स्वबुद्धिमात्रकल्पिते तर्के "नैषा तर्केण मतिरापनेयेति" कठ उ० भाष्ये "स्वबुद्ध्यभ्यूहेन केवलेन तर्क्यमाण इति" उक्तम् ।

**अभ्यूहनीय** त्रि० अभितः ऊहनीयः । स्वबुद्ध्या तर्कणीये ।

**अभ्यूह्य** त्रि० अभितः ऊह्यः । १स्वबुद्धिमात्रेण तर्कणीये । ल्यप् । २अभितस्तर्कयित्वेत्यर्थे अव्य० ।

**अभ्र** अतौ भ्वादि०पर०सक० सेट् । अभ्रति आभ्रीत् आनभ्र अभ्रम् "तेष्वसौ दन्दशूकारिर्वनेष्वानभ्र निर्भयः" भट्टिः ।

**अभ्र** न० अभ्र-अच् । १मेघे २मुस्तके ३आकाशे च अब्भ्रशब्देऽधिकं दृश्यम् । "तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने" मनुः "अभ्रं लिहाग्रं रविमार्गभङ्गम्" भट्टिः । "वर्षात्ययेन रुचमभ्रघनादिवेन्दोः" रघुः कुर्वादिगणपाठात् तन्नामके ऋषिभेदे पु० । तस्य अपत्यम् कुर्वादि०ण्य । आभ्र्यः तदपत्ये पुंस्त्री । अभ्रमिवाचरति क्यङ् अभ्रायते ।

**अभ्रक** न० पु० अभ्र-कन् । कचित् पुंस्त्वमप्यस्य । (आब)-धातुभेदे एतच्च गौरीरजोजातं यथोक्तम् रसेश्वरदर्शने शिववाक्यम् । "अभ्रकस्तव बीजन्तु मम बीजन्तु पारदः अनयोर्मेलनं देवि! मृत्युदारिद्र्यनाशनम्" । जारिताभ्रस्यैव पारदमेलनद्वारा मृत्युनाशकत्वमतस्तज्जारणविधिर्दर्शितः चक्रदत्ते । "कृष्णाभ्रकमनेकशपुर्व्ये ज्जाल्य चैकपालकं कृत्वा । काष्ठमयोदूखलके चूर्णं मुषलेन कुर्वीत ॥ भूयो दृषदि च पिष्टं वासःसूक्ष्मावकाशतलगलितम् । मण्डूकपर्णिकायाः प्रचुररसे स्थापयेत्त्रिदिनम् ॥ उद्धृत्य तद्रसादथ पिण्याड्डैमन्तिकधान्यभक्तास्यम् । अचोदात्यन्ताम्लस्वच्छजलेन प्रयत्नेन । मण्डूकपर्णिकायाः पूर्व्वं सुरसेनालोडनं कुर्यात् । स्थालीपाकं पुटनं चाद्यैरपि भृङ्गराजाद्यैः ॥ ताडादिपत्रमध्ये कृत्वा पिण्डं निधाय भस्माग्नौ । तावद्दहेन्न यावल्लीनोऽग्निष्ट श्यते सुचिरम् ॥ निर्वापयेच्च दुग्धेन दुग्धं प्रक्षाल्य वारिणा तदनु । पिष्ट्वा घृष्ट्वा वस्त्रे चूर्णं निश्चन्द्रकं कुर्यात्" इति ।

**अभ्रंलिह** त्रि० अभ्रं गगनं लेढि स्पृशति अभ्र+लिह—खश् मुम् । गगनस्पर्शिनि अत्युच्चे "प्रासादमभ्रंलिहमारुरोह" रघुः "अभ्रंलिहाग्रं रविमार्गभङ्गमिति" भट्टिः ।

**अभ्रङ्कष** त्रि० अभ्रं गगनं कषति पीडयति उच्चत्वात् अभ्र+कष—खश् मुम् । अत्युच्चे । "आदायाभ्रङ्कषं प्रायान्मलयं फलशालिनम्" भट्टिः ।

**अभ्रजा** त्रि० अभ्रात् मेघात् जायते जन—विट् ५त० । मेघजाते "यो अभ्रजा वातजा यश्च शुष्मोवनस्पतीन्त्सचतां पर्व्वतांश्च, अथ०१,१२,३जन—ड । अभ्रजोऽप्युक्तार्थे त्रि०

**अभ्रनाग** पु० ६त० १ ऐरावते गजे ।

**अभ्रपथ** पु० ६त० अच् समा० । विमाने गगनमार्गे ।

**अभ्रपिशाच** पु० अभ्रे गगने पिशाच इव । राहुग्रहे तस्य छायात्मकत्वेन नीलवर्णतया पिशाचतुल्यत्वम् ।

**अभ्रम** पु० भ्रमोभ्रमणं मिथ्याज्ञानञ्च अभावे न०त० । १भ्रमाभावे । न०ब० । २भ्रान्तिशून्ये त्रि० । [जटामांस्याम् ।

**अभ्रमांसी** स्त्री अभ्रमिव जटाया मांसमस्य गौ०ङीष् ।

**अभ्रमाला** स्त्री ६त० । मेघसमूहे । [केन लिप्तायां स्त्रियाञ्च ।

**अभ्रलिप्ती** स्त्री ३त०ङीप् । १अल्पाभ्रैर्लिप्तायां दिवि २अल्पमुस्त-

**अभ्रवर्ष** पु० अभ्रैर्मेघैर्वृष्यते कर्मणि घञ् । १मेघैः सिच्यमाने "दिव्यानकोशासो अभ्रवर्षाः" ऋ० ८,८८,६, अभ्रवर्षाः अभ्रैर्वृष्यमाणाः भा० । भावे घञ् । २मेघवर्षणे ।

**अभ्रवाटिका** स्त्री अभ्रेण शून्येन वाटो वेष्टनं यस्याः गौ० ङीष् । अम्रातकवृक्षे । तस्याः पत्रशून्यकाले शून्याष्टतत्वेन प्रतीतेस्तथात्वम् ।

**अभ्राज** त्रि० न भ्राजते भ्राज-अच् न०त० । १ दीप्तिशीलभिन्ने २सामगानविशेषद्रष्टरि ऋषिभेदे पु० । तेन दृष्टं साम अण् । आभ्राजं तद्दृष्टे सामभेदे न० तच्च "परिस्त्रानो गरिष्ठा इत्यस्यामृचि गीयमानं साम" ता०ब्रा०भा० । तदपि ऊहगाने ६प्र० दर्शितम् । तस्य च पाठविनियोगः ता०ब्रा० उक्तः यथा "भ्राजाभ्राजे पवमानमुखे भवत" इति गवामयने विषुवन्नामाहे तत् पाठ्यम् ।

**अभ्रातृ(क)** पुंस्त्री नास्ति भ्राता यस्य वेदे न कप् लोके तु कप् । भ्रातृशून्ये । "अभ्रातेव पुंस एति प्रतीची" ऋ०१,१२२,३, कबभावे स्त्रियां ङीप् । "नाभ्रातीमुपयच्छेत" स्मृ० । कपि तु अभ्रातृका तत्रार्थे "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्" मनुः ।

**अभ्रातृव्य** त्रि० नास्ति भ्रातृव्यः शत्रुर्यस्य । शत्रुरहिते "अभ्रातृव्योभ्रातृव्यहा भवति य एवं विद्वान्" शत०ब्रा०

**अभ्रान्त** त्रि० विरोधे न०त० । १ भ्रान्तभिन्ने यथार्थज्ञानयुक्ते २ भ्रमणशून्ये स्थिरे च ।

**अभ्रान्ति** स्त्री अभावे न०त० । १मिथ्यानाभावे २ भ्रमणाभावे च । न०ब० । ३मिथ्याज्ञानशून्ये ४ भ्रमणशून्ये च त्रि० ।

**अभ्रावकाश** पु०अभ्रमेवावकाशः । इतरावरणशून्ये आकाशमात्रावकाशे ।